# ॥ કલ્કિસ્તવઃ અથવા દશાવતારસ્તવઃ ॥

.. kalkistavaH or dashAvatArastavaH ..

sanskritdocuments.org

August 20, 2017

# .. kalkistavaH or dashAvatArastavaH ..

## ॥ કલ્કિસ્તવઃ અથવા દશાવતારસ્તવઃ ॥

## Sanskrit Document Information

Text title : kalkistavaH

File name : kalkistavaH.itx

Category : vishhnu, dashAvatAra, stotra

Location : doc_vishhnu

Language : Sanskrit

Subject : hinduism/religion

Transliterated by : Ravindra Bhalekar ravibhalekar at hotmail.com

Proofread by : Ravindra Bhalekar ravibhalekar at hotmail.com

Description-comments : kalkipurANa

Latest update : March 19, 2004

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ કલ્કિસ્તવઃ અથવા દશાવતારસ્તવઃ ॥

શ્રીગણેશાય નમઃ ।
રાજાન ઊચુઃ । ગદ્યાનિ । જય જય નિજમાયયા
કલ્પિતાશેષવિશેષકલ્પનાપરિણામજલાપ્લુતલોકત્રયોપકારણમાકલયમનુમનિશમ્ય
 પૂરિતમવિજનાવિજનાવિર્ભૂતમહામીનશરીર ત્વં
નિજકૃતધર્મસેતુસંરક્ષણકૃતાવતારઃ ॥ ૧॥

પુનરિહ જલધિમથનાદૃતદેવદાનવગણાનાં
મન્દરાચલાનયનવ્યાકુલિતાનાં સાહાય્યેનાદૃતચિત્તઃ ।
પર્વતોદ્ધરણામૃતપ્રાશનરચનાવતારઃ કૂર્માકારઃ પ્રસીદ
પરેશ ત્વં દીનનૃપાણામ્ ॥ ૨॥

પુનરિહ દિતિજબલપરિલંઘિતવાસવસૂદનાદૃત
જિતભુવનપરાક્રમહિરણ્યાક્ષનિધન
પૃથિવ્યુદ્ધરણસઙ્કલ્પાભિનિવેશેન ધૃતકોલાવતાર પાહિ નઃ ॥ ૩॥

પુનરિહ ત્રિભુવનજયિનો મહાબલપરાક્રમસ્ય
હિરણ્યકશ્યપોરર્દિતાનાં દેવવરાણાં ભયભીતાનાં
કલ્યાણાય દિતિસુતવધપ્રેપ્સુર્બ્રહ્મણો વરદાનાદવધ્યસ્ત ન
શસ્ત્રાસ્ત્રારાત્રિદિવાસ્વર્ગમર્ત્યપાતાલતલે
દેવગન્ધર્વકિન્નરનરનાગૈરિતિ વિચિન્ત્ય નરહરિરૂપેણ
નખાગ્રભિન્નોરું દષ્ટદન્તચ્છદં ત્યક્તાસું કૃતવાનસિ ॥ ૪॥

પુનરિહ ત્રિજગજ્જયિનો બલેઃ સત્રે શક્રાનુજો બટુવામનો
દૈત્યસંમોહનાય ત્રિપદભૂમિયાચ્ચાચ્છલેન
વિશ્વકાયસ્તદુત્સૃષ્ટજલસંસ્પર્શવિવૃદ્ધમનોઽભિલાષસ્ત્વં
ભૂતલે બલેર્દૌવારિકત્વમઙ્ગીકૃતમુચિતં દાનફલમ્ ॥ ૫॥

પુનરિહ હૈહયાદિનૃપાણામમિતબલપરાક્રમાણાં
નાનામદોલ્લંઘિતમર્યાદાવર્ત્મનાં નિધનાય ભૃગુવંશજો
જામદગ્ન્યઃ પિતૃહોમધેનુહરણપ્રવૃદ્ધમન્યુવશાત્
ત્રિઃસપ્તકૃત્વો નિઃક્ષત્રિયાં પૃથિવીં કૃતવાનસિ
પરશુરામાવતારઃ ॥ ૬॥

પુનરિહ પુલસ્ત્યવંશાવતંસસ્ય વિશ્રવસઃ પુત્રસ્ય
નિશાચરસ્ય રાવણસ્ય લોકત્રયતાપનસ્ય નિધનમુરરીકૃત્ય
રવિકુલજાતદશરથાત્મજો વિશ્વામિત્રાદસ્ત્રાણ્યુપલભ્ય વને
સીતાહરણવશાત્પ્રવૃદ્ધમન્યુનાઽમ્બુધિંવાનરૈર્નિબધ્ય
સગણં દશકન્ધરં હતવાનસિ રામાવતારઃ ॥ ૭॥

પુનરિહ યદુકુલજલધિકલાનિધિઃ
સકલસુરગણસેવિતપાદારવિન્દદ્વન્દ્વો
વિવિધદાનવદૈત્યદલનલોકત્રયદુરિતતાપનો વસુદેવાત્મજો
કૃષ્ણાવતારો બલભદ્રસ્ત્વમસિ ॥ ૮॥

પુનરિહ વિધિકૃતવેદધર્માનુષ્ઠાનવિહિતનાનાદર્શનસંઘૃણઃ
સંસારકર્મત્યાગવિધિના બ્રહ્માભાસવિલાસચાતુરીં
પ્રકૃતિવિમાનનામસમ્પાદયન્ બુદ્ધાવતારસ્ત્વમસિ ॥ ૯॥

અધુના કલિકુલનાશાવતારો બૌદ્ધપાષણ્ડમ્લેંચ્છાદીનાં ચ
વેદધર્મસેતુપરિપાલનાય કૃતાવતારઃ કલ્કિરૂપેણાસ્માન્
સ્ત્રીત્વનિરયાદુદ્ધૃતવાનસિ તવાનુકમ્પાં કિમિહ કથયામ્ ॥ ૧૦॥

ક્વ તે બ્રહ્માદીનામવિજિતવિલાસાવતરણં ક્વ નઃ
કામવામાકલિતમૃગતૃષ્ણાર્તમનસામ્ સુદુષ્પ્રાપ્યં
યુષ્મચ્ચરણજલજાલોકનમિદં કૃપાપારાવારઃ
પ્રમુદિતદૃશાઽઽશ્વાસય નિજાન્ ॥ ૧૧॥

ઇતિ શ્રીકલ્કિપુરાણેઽનુભાગવતે ભવિષ્યે દ્વિતીયાંશે
નૃપકૃતકલ્કિસ્તવ સમ્પૂર્ણઃ ॥

Encoded and proofread by Ravindra Bhalekar ravibhalekar @ hotmail.com

.. kalkistavaH or dashAvatArastavaH ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XeLaTeX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*